**अंशकद्वितय** ( aṁśaka–dvitaya ) *n.* a group of two squares भ्रामितानां च वृत्तानां क्षेत्राख्यपरिधेर्द्विज । अंशकद्वितयं मध्ये सवितानेव शिष्यते PauṣkS. 7. 35.

**अंशकप** ( aṁśaka–pa ) *m.* lord of the one-ninth part of a *rāśi* क्षेत्राधिपसंदृष्टे शशिनि···धनवान् द्रेष्काणांशकपैर्वा LaJāta. x. 6. 3.

**अंशकपति** ( aṁśaka–pati ) *m.* lord of the one–ninth part of a *rāśi* वीर्यान्वितोंऽशकपतिर्निरुणद्धि पूर्वं राशीक्षणस्य फलमंशफलं ददाति Bṛhajjā. 19. 9.

**अंशकप्रमाण** ( aṁśaka–pramāṇa ) *n.* the extent or quantity of a share दृष्टाः सप्तत्रिंशत्कपित्थफलराशयो वने पथिकैः । सप्तदशापोह्य हृते व्येकाशीत्यांशकप्रमाणं किम् GaṇiSāSaṁ. 5. 120.

**अंशकभक्त** ( aṁśaka–bhakta ) *adj.* divided by the fraction दृश्यादंशकभक्ताच्चतुर्गुणान्मूलकृतियुतान्मूलम् GaṇiSāSaṁ. 3. 52.

**अंशकरहित** ( aṁśaka–rahita ) *adj.* falling outside the ninth part of a *rāśi*; associated with no *aṁśaka* संक्रान्तिकाले भास्करोंऽशकरहितो भवति CaturCin. iii (2). 420. 3.

**अंशकराशि** ( aṁśaka–rāśi ) *m.* the number forming the numerator of the fraction गुणकारोंऽशकराशेर्हारहरो भागभागजातिविधौ GaṇiSāSaṁ. 2. 99.

**अंशकराशिप** ( aṁśakarāśi–pa ) *m.* lord of a *rāśi* and its quarter भोमशुक्रबुधाः···गुरुमन्दार्किगुरवोंऽशकराशिपाः TantrRā. 31. 22.

**अंशकर्तृत्व** ( aṁśakartṛ–tva ) *n.* the right of dividing the property अंशित्वमंशकर्तृत्वं समं न तु स्वेच्छया स्वार्जितवन्न्यूनाधिकांशकर्तृत्वम् VīraMi. (Vyavahāra) 447. 12.

**अंशकला** ( aṁśa–kalā ) *f.* a quarternal or sexadecimal incarnation एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् BhāgP. i. 3. 28; अस्यैवांशकलाः सर्वे मत्स्यकूर्मादयश्च ये BṛBrahmS. i. 12. 79; iv. 9. 70; किंतु ज्ञानप्रभावादेः पूर्णांशांशानुदर्शनात् । पूर्णमंशकलाभागं वदन्ति जगदीशितुः SātvaT. 3. 5; अत्रांशिरूपेणैकोंऽशकलारूपेण तु बहुधा इत्यर्थः प्रतीयते GoviBh. 166. 7 (*on* ii. 3. 43)

**अंशकल्पन** ( aṁśa–kalpana ) *n.* imputation of parts अस्ति चाविभागैकद्रव्यत्वेऽप्यंशकल्पनमाकाशस्य TattvPradī. (A.) 198. 7 (*on* 2. 48)

**अंशकल्पना** ( aṁśa–kalpanā ) *f.* **1** imputation or attribution of parts निरंशस्य न चाप्यंशकल्पनाऽप्युपपद्यते BṛĀraUBhVā. 1. 1073; **2** division into squares वक्ष्ये···अंशकल्पनाम् PauṣkS. 8. 14; **3** allotment of portions (of inheritance), apportionment of inheritance उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना ManuSm. 9.116; द्विप्रकारो विभागस्तु दायादानां प्रकीर्तितः । वयोज्येष्ठक्रमेणैकः समा परांशकल्पना BṛhaspaSm. 198. 17; ननु संभूयकारिणां समयानुसारत एवांशकल्पनया लाभहान्योर्विभागो भविष्यतीति व्यर्था विभागविधयः SmṛtiCan. iv. 441. 4; तदभावे संसृष्टिव्यक्तिपर्यालोचनेनांशकल्पनया संसृष्टिन एव···गृह्णीयुः BālamBh. ii. 246. 19 (*on* 2. 137); भ्रातुरेकत्वे भगिनीनां च सप्ताष्टत्वे भ्रातृभागस्यैकनिष्ठत्वे तच्चतुर्थभागस्य स्वल्पत्वेन तत्राप्यंशकल्पनायामतितुच्छता स्यात्तदंशस्य Subodhi. 54. 22 (*on* 21. 124); अनेकपितृकाणां···पैतामहे धने विभज्यमाने यः पितॄणामंशः स एव, न पुनः प्रत्येकमंशकल्पना DīpKa. 55. 9 (*on* 2. 120); पैतामहे धने पित्रा सह विभागे पितुरिच्छया नांशकल्पना, किंतु पितुर्द्विगुणः पुत्राणां च समोंऽशः स्यात् VīraMi. 584. 1 (*on* 2.121); भिन्नमातृकाणां दुहितॄणां दौहित्राणां च अनेकपितृकाणां तु पितृतो भागकल्पना इति न्यायेनांशकल्पना VyavaMa. 159. 12.

**अंशकशून्य** (aṁśaka–śūnya ) *adj.* without any *aṁśaka* associated with it, outside the ninth part of a *rāśi* निरंशे अंशकशून्ये संक्रान्तिकाले CaturCin. iii (2). 420. 3.

**अंशकशेष** ( aṁśaka–śeṣa ) *m.* the remaining degrees of a planet at a particular time अंशकशेषेण युतात् लिप्ताशेषात्तदन्तरादथवा । भानोर्ज्ञदिने द्युगणं कथयति कुट्टकज्ञः सः BrāhmSphuSi. 18. 55; 18. 27; 18. 46.

**अंशकांशक** ( aṁśakāṁśaka ) *m.* secondary or partial incarnation नाहं विरिञ्चो···न च ब्रह्मपुत्राः···विदाम यस्येहितमंशकांशकाः BhāgP. vi. 17. 32.

**अंशकाद्य** ( aṁśakādya ) *adj.* **1** in the terms of degrees, given as degrees etc. विशोध्य खण्डानि दशघ्नशेषादशुद्धलब्धं धनुरंशकाद्यम् GrahaGa. 8. 15 (41); KaraṇaKu. 2. 8 (10); GrahaLā. 1. 10; **2** beginning with the zodiac signs साध्यानामपि विज्ञेयमंशकाद्यमनुग्रहे TantrRā. 1. 44.

**अंशकान्त** ( aṁśakānta ) *m.* [probably अंशुकान्त] the hem or end of the garment अंशकान्तेन हृदयं वीजयत्याहितेक्षणम् PadmP.(Ra.) 46. 184.

**अंशकाम** ( aṁśa–kāma ) *adj.* desirous of a share अंशकामा वयं ते च न चास्माभिर्न तौर्जितम् MahāBhā. xii. 7. 23.

**अंशकामिन्** ( aṁśa–kāmin ) *adj.* desirous of a part (of the fruit) एकैकस्य कर्तुः सर्वफलसद्भावात् सर्वफलकामिनामेवाधिकारः न त्वंशकामिनाम् NyāyMāVi. 311. 26 (*on* vi. 2. 1).

**अंशकायुस्** ( aṁśakāyus ) *n.* the period of life based on *navāṁśa* calculation लग्ने यद्यंशकायुर्भवति बलयुते JātaPā. 5. 33.

S. D. 2

**अंशकृति** ( aṁśa–kṛti ) *f.* the square of the numerator हरवर्गेणांशकृतिं विभजेल्लब्धं भवेद्वर्गः ĀryaSi. 15. 16 (147)

**अंशकॢप्ति** ( aṁśa–kḷpti ) *f.* **A** division into parts औपाधिक्यंशकॢप्तिर्घटगगननयात्स्यात् TattvMu. 5. 49; विविधोपाधियोगस्वभावादौपाधिक्यंशकॢप्तिः TattvMu. 5. 53; **B** allotment of shares सर्वेभ्योंऽशेभ्यः···तावत्तावद् गृहीत्वांशकॢप्तिः कर्तव्या Subodhi. 53. 27 (*on* 2. 122)

**अंशकोद्भव** ( aṁśakodbhava ) *adj.* born of a part or an aspect अन्यासामपि जातीनामंशकोद्भवयोषितः···परिवर्जयेत् Mānaso. iii. 20. 1807.

**अंशक्रम** ( aṁśa–krama ) *m.* the order or sequence of the parts or shares स्तनजदधिगुलत्रैफलांभांसि चैवम् । वृद्धान्यंशक्रमेण स्फुटशशिधवलं चूर्णमुक्तम् ĪśānŚiPa. ii. 33. 66; यदि सर्वेषामेव प्रमादेन नाशितं तदांशक्रमेणैव क्षयः कल्पनीयः VīraMi 714. 5 (*on* 2. 260)

**अंशग** ( aṁśa–ga ) *adj.* found in the parts यद्यंशगो न संयोगः कार्येषु प्रथिमा कथम् AnuVyā. 26B.2 (*on* 2. 2)

**अंशगण** ( aṁśa–gaṇa ) *m.* **A** a group of squares (संयुक्तं चाथ साधयेत्) ततोऽश्रिनिचयं सर्वं शेषेणांशगणेन तु PauṣkS. 5. 121; **B** a group of *navāṁśas* कुर्वन्ति नाशं विषनाडिकास्ता लग्नाश्रितानंशगणान्विशेषान् VasiS. 32. 81; **C** a series of numerators त्रितयादिचतुश्चयकोंऽशगणो द्विमुखद्विचयोऽत्र हरप्रचयः GaṇiSāSaṁ. 3. 19.

**अंशगति** ( aṁśa–gati ) *f.* a kind of *Lāsyāṅga* of *Deśīnṛtta* शस्त्रव्यायामभेदेषु नर्तनेष्वितरेष्वपि । रम्यानंशान् क्षणं नृत्ते नर्तकी दर्शयेद्यदा । उचितावसरे कांश्चित् तदांशगतिरुच्यते NṛttaRa. 6. 168.

**अंशगुण** ( aṁśa–guṇa ) *m.* the product of the numerators परिवर्त्य भागहारच्छेदांशौ छेदसंगुणच्छेदः । अंशोंऽशगुणो भाज्यस्य भागहारः सवर्णितयोः BrāhmSphuSi. 12. 4.

**अंशग्रह** ( aṁśa–graha ) *m.* knowledge of an aspect or part (of a thing) अंशग्रहविवेकत्वान्मन्दाः किमतिशेरते NyāyVi. 2. 318 ( Vādirāja अंशस्य वस्तुधर्मस्य क्षणक्षयादेर्ग्रहः प्रतिवेदनम् )

**अंशग्रहणयोग्य** ( aṁśagrahaṇa–yogya ) *adj.* fit to receive the ancestral property बहुषु पुत्रेषु रिक्थाभावेऽप्यंशग्रहणयोग्यस्यैवर्णापाकरणेऽधिकारः Mitā 168. 29 (*on* 2. 51)

**अंशग्रहणविरोधिन्** ( aṁśagrahaṇa–virodhin ) *adj.* opposed to the acceptance of the inheritance, preventing such an acceptance एतेषां···पुत्रा निर्दोषा अंशग्रहणविरोधिक्लैब्यादिदोषरहिता भागहारिणोंऽशग्राहिणो भवन्ति Mitā. 250. 12 (*on* 2. 141); VyavaNi. 421. 3; निरंशकपुत्राणामंशग्रहणविरोधिक्लैब्याद्यभावेऽपि निरंशकपुत्रत्वेन पैतामहधनानर्हत्वे प्राप्ते SmṛtiCan. iv. 633. 5; iv. 633. 8; iv. 633. 21.

**अंशग्रहणाधिकार** ( aṁśagrahaṇādhikāra ) *m.* the right to take the share in the inheritance नायं न्यायो मातुरादौ अंशग्रहणाधिकारापादनायालम् SmṛtiCan. iv. 688. 8.

**अंशग्रहणाधिकारिन्** ( aṁśagrahaṇādhikārin ) *adj.* entitled to have a share in the property अंशग्रहणाधिकारिणां पुत्रान्तराभावे सकलरिक्थग्रहणाधिकारेण पुत्रेण सह समांशभाक्त्वस्योक्तत्वात् Subodhi. 66. 32 (*on* 2. 136); पुत्रः पित्रा संसृष्टोऽसंसृष्टो वा कृत्स्नं पित्र्यमंशं गृह्णीयात् पुत्रत्वस्यैवांशग्रहणाधिकारितावच्छेदकत्वात् VyavaMa. 150. 15; BālamBh ii. 197. 21 (*on* 2. 135)

**अंशग्राहिन्** ( aṁśa–grāhin ) *adj.* who gets a share in property अंशग्राहिभिस्ते भरणीयाः ViṣṇuSm. 15. 39.

**अंशघन** ( aṁśa–ghana ) *m.* the cube of the numerator हारघनेनांशघनं विभजेल्लब्धं घनो भवति ĀryaSi. 14. 17 (148)

**अंशघन** ( aṁśa–ghana ) *adj.* having the thickness of an *aṅgula* मूले त्वंशघना त्वग्रे मात्रमात्रघना भवेत् (आसनस्याधोभित्तिका) ĪśānŚiPa. ii. 48. 105.

**अंशचतुष्क** ( aṁśa–catuṣka ) *m.* a group of four parts जगन्निवेरंशचतुष्क एकको नृपाङ्गनासु प्रथमामशिश्रियत् Rāgh. 1. 51.

**अंशचतुष्टय** ( aṁśa–catuṣṭaya ) *n.* a group of four parts or elements or units (प्रमथानां) तु विस्तारो वपुषोंऽशचतुष्टयम् SamarāSū. 75. 14; ब्राह्मणीकन्यकायै स्वजातिविहितादंशचतुष्टयरूपान्निजाद् भागाच्चतुरंशं दद्यात् Subodhi 54. 3 (*on* 2. 124); BālamBha ii. 158. 21 (*on* 2. 124); न ह्यंशचतुष्टयपरिच्छिन्नः परमेश्वर इति सावधारणमुच्यते ŚivārkaMaDī. i. 281. 26; i. 281. 27; i. 281. 31 (*on* i. 1. 27)

**अंशज** ( aṁśa–ja ) *adj.* [*f.* –ā ] born of a portion, a partial incarnation, born of one's own person (प्रवदन्ति) ··· नारायणस्यांशजमेकपुत्रं द्वैपायनम् HariVaṁ. 1. 2; यद्यप्यशेषभूतस्य वयं ते च तवांशजाः ViṣṇuP. iii. 17. 38; अंशजः पुत्रिकापुत्रः क्षेत्रजः DevīBhāP. ii. 6. 47; स्वस्वकालेंऽशजाः गुणाः । चिन्तनीयाः ŚivaP. v. 26. 20 (436B. 12); तस्माद् ब्रह्मा महादेव्याश्चांशजश्च हरिस्तथा LiṅgaP. i. 41. 13; तस्याश्चैवांशजाः सर्वाः स्त्रियः LiṅgaP. i. 5. 29; श्रीः···